श्री काञ्ची कामकोटी जगद्गुरु **श्री शंकर जयेन्द्रसरस्वती** श्रीपादैः कृत

# गुरुस्तुतिः

१. अपार करुणा सिन्धुं ज्ञानदम् शान्तरूपिणम्।
श्री चन्द्रशेखर गुरुं प्रणमामि मुदाऽन्वहम्॥

२. गुरुवार सभाद्वारा शास्त्रसंरक्षणं कृतम्।
अनूराधा सभाद्वारा वेदसंरक्षणम् कृतम्॥

३. मार्गशीर्ष मासवरे स्तोत्रपाठ प्रचारणम्।
वेदभाष्य प्रचारार्थं रत्नोत्सव निधिः कृतः॥

४. कर्मकाण्ड प्रचारार्थं वेदधर्मसभा कृता।
वेदान्तार्थ प्रचारार्थं विद्यारण्यनिधिः कृतः॥

५. शिलालेख प्रचारार्थं उट्टंकितनिधिः कृतः।
गोब्राह्मण हितार्थाय वेदरक्षण गो निधिः॥

६. गोशाला पाठशाला च गुरुभिः तत्र निर्मिते।
बालिकानाम् विवाहार्थं कन्यादाननिधिः कृतः॥

७. देवार्चकानां साह्यार्थं कच्छि मूदूर् निधिः कृतः।
बालवृद्धातुराणां च व्यवस्था परिपालने॥

८. अनाथप्रेत संस्कारात् अश्वमेधफलं लभेत्।
इति वाक्यानुसारेण व्यवस्थ तत्र कल्पिता॥

९. यत्र श्री भगवत्पादैः क्षेत्र पर्यटनं कृतम् ।
तत्र तेषां शिलामूर्तिं प्रतिष्ठाप्य शुभं कृतम् ।।

१०. भक्तवाञ्छाभिसिद्ध्यर्थं नामतारक लेखनम् ।
राजतं च रथं कृत्वा कामाक्ष्याः परिवाहणम् ।।

११. कामाक्ष्यम्बा विमानस्य स्वर्णपत्रैस्समावृतिः ।
तथैवोत्सव कामाक्ष्याः स्वर्णवर्मपरिष्कृतिः ।।

१२. ललिता नाम साहस्र स्वर्णमाला विराजते ।
श्री देव्याः पर्वकालेषु सुवर्ण रथचालनम् ।।

१३. चिदम्बर नटेशस्य सुवैडूर्य किरीटकम् ।
करेऽभयप्रदे पादे कुञ्चिते रत्नभूषणम् ।

१४. मुष्टि तण्डुल दानेन दरिद्राणां च भोजनम् ।
रुग्णालये भगवतः प्रसाद विनियोजनम् ।।

१५. लोकक्षेम हितार्थाय गुरुभिः बहुतत् कृतम् ।
स्मरन् तद्वन्दनं कुर्वन् जन्म साफल्यमाप्नुयात् ।।